परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।

यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १४.१ ॥

paraṁ bhūyaḥ pravakśyāmi jñānānāṁ jñānamuttamam |
yajjñātvā munayaḥ sarve parāṁ siddhimito gatāḥ || 14.1||

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ १४.२ ॥

idaṁ jñānamupāśritya mama sādharmyamāgatāḥ |
sarge'pi nopajāyante pralaye na vyathanti ca || 14.2||

मम योनिर्महद् ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।

संभवः सर्वभूतानां ततो भवति भारत ॥ १४.३ ॥

mama yonirmahad brahma tasmingarbhaṁ dadhāmyaham |
sambhavaḥ sarvabhūtānāṁ tato bhavati bhārata || 14.3||

सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः ।

तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ १४.४ ॥

sarvayoniṣu kaunteya mūrtayaḥ sambhavanti yāḥ |
tāsāṁ brahma mahadyoniraham bījapradaḥ pitā || 14.4||

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।

निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ १४.५ ॥

sattvaṁ rajastama iti guṇāḥ prakṛtisambhavāḥ |
nibadhnanti mahābāho dehe dehinamavyayam || 14.5||